°रथसाधने १दण्डभेदे (पाचनी) अमरः। २अक्ते सि° कौ°। ३आकर्षक्रियायाम् ४व्याधिभेदे च संक्षिप्तसा°।

**त्रौक** गत्यां चुरा° आ° सक° सेट्। त्रौकयते अदित् अतुत्रौकत।

**त्र्यंश** पु° तृतीयोऽंशः। १तृतीये अंशे। "सर्वस्मिन् विधुपापयुक्ततनुत्वादर्द्धं निशाङ्कोऽर्द्धटीत्र्यंशं वै कुनवांशकं ग्रहणतः पूर्वं दिनानां त्रयम्" मुहू°। २त्रिगुणितेऽंशे च "त्र्यंशं दायाद् हरेद्विप्रो द्वावंशौ क्षत्रियासुतः" मनुः

**त्र्यक्ष** पु° त्रीण्यक्षीण्यस्य ष समा°। त्रिनेत्रे शिवे त्रिका° "त्र्यक्षपत्न्या समादिष्टः सदृशः सज्जनः प्रतिः" हरिवं° १७६ अ°। २नेत्रत्रययुक्तमात्रे त्रि°। "चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः। रासभारावसदृशं ररास च ननाद च" भा° स° ४२ अ°। स्त्रियां ङीष्। "द्व्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्विकाम्" भा° व° २८८ अ°। राक्षसीभेदोक्तौ। आर्षे क्वचित् न ष समा°। त्र्यक्षि शिवे। "त्र्यक्षाय पूष्णो दन्तभिदे वामनाय शिवाय च" भा° आनु° ८ अ° शिवस्तुतौ।

**त्र्यक्षर** पु° त्रीणि अकारोकारमकाररूपाणि अक्षराणि यत्र। १प्रणवे "आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्" मनुः। त्रीण्यक्षराणि वर्णा यत्र। मध्यानामके २छन्दोभेदे न°। "विष्णुस्त्र्यक्षरेण (छन्दसा) त्रींल्लोकानुदजयत्" यजु° ९।३१। "विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा त्रीन् भूरादीन् लोकान् उदजयत्" वेददी°। त्रिवर्णात्मके तन्त्रोक्ते ३मन्त्रभेदे तन्त्रसारे भूरिप्रयोगः। ४विद्यायां स्त्री गौरा° ङीष्। ५वर्णत्रययुक्तमात्रे त्रि°। "तदेतत् त्र्यक्षरं सत्यमिति स इत्येकमक्षरं त्रीत्येकमक्षरमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतं सत्येन परिगृहीतं सत्यभूयमेव भवति नैवंविद्वांसमनृतं हिनस्ति" शत° ब्रा° १४।८।४।२। ६घटके त्रिका°। [२ईश्वरे पु° हेमच°।

**त्र्यङ्ग(ङ्क)ट** न°। १शिक्यभेदे २धौताञ्जने च मेदि°।

**त्र्यङ्ग** न° त्रीणि अङ्गान्यस्य। सौविष्टकृते हविषि "मध्यं जुह्वां द्वेधा कृत्वाऽवद्यत्येष त्र्यङ्गेषु" शत° ब्रा° १।८।३।१८। "त्र्यङ्गस्य दोष्णो गुदं द्वेधा कृत्वावद्यति त्र्यङ्गायै श्रोणेरथ हिरण्यशकलावदधाति" १९। त्र्यङ्गाय हितं यत् त्र्यङ्ग्य तत्साधनद्रव्ये।

**त्र्यङ्गुल** त्रि° तिस्रोऽङ्गुल्यः प्रमाणमस्य तद्धितार्थद्वि° इत्यस्य तस्य लुकि अच् समा°। १अङ्गुलित्रयमिते "द्व्यङ्गुलं त्र्यङ्गुलं वा तक्षातिक्रान्तं यूपस्य" कात्या° श्रौ° ६।२१।३०। २तथाभूतखातान्विते च स्त्रियां टाप् सा च सोमयज्ञस्य वेदिः। "तं खनन्त इवान्वीषुस्तं त्र्यङ्गुलेऽन्वविन्दंस्तस्मात् त्र्यङ्गुला वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य वेदिं चक्रे" शत° ब्रा° १।२।५।९। "पाञ्चिः सोमयागस्यापि वेदिं त्र्यङ्गुलखातामेव मेने" भा°

**त्र्यञ्जन** न° समा° द्वि°। कालाञ्जनरसाञ्जनपुष्पाञ्जनरूपे मिलिते अञ्जनत्रये राजनि°।

**त्र्यञ्जल(लि)** न° त्रयाणामञ्जलीनां समाहारः वा टच्सम°। १समाहृते अञ्जलित्रये "त्रिभिरञ्जलिभिः क्रीतः तद्धितार्थद्विगौ तु तद्धितलुकि न टच्। त्र्यञ्जलि इत्येवेति भेदः सि° कौ°।

**त्र्यधिष्ठान** पु° त्रीणि मनोवाक्शरीराणि अधिष्ठानान्यस्य तिसृणां जाग्रदादीनामधिष्ठानं वा ६त°। १जीवे तत्पुरुषपक्षे न° "तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः" मनुः जाग्रदाद्यवस्थात्रयसाक्षिणि कूटस्थे २चैतन्ये न°।

**त्र्यध्वगा** स्त्री त्रिभिरध्वभिर्गच्छति गम–ड ६त°। गङ्गायाम् त्रिका°।

**त्र्यनीक** पु° त्रीणि उष्णवर्षशीताख्यानि अनीकानि मुखान्यस्य। संवत्सराभिमानिदेवभेदे "त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान्। त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम्" ऋ° ३।५६।३। "त्र्यनीकस्त्रिभिरुष्णवर्षशीताख्यैरनीकैर्मुखैरुपेतः" भा°। २हस्त्यश्वरथाङ्गे सेनाभेदे स्त्री।

**त्र्यमृतयोग** पु° त्रयाणां तिथिवारनक्षत्राणाममृततुल्यो योगः। तिथिनक्षत्रवारभेदानां योगभेदे। स च योगः ज्यो°उक्तो यथा "नन्दा भौमार्कवारे श्रवणशतभिषाद्रीन्त्यचित्राग्निमूलासार्पैन्द्रा समेता, शशिनि भृगुसुते फल्गुयुग्मभाद्रयुग्मैः। सौम्याहे वै जया स्यान्मृगगुरुहरिमैन्द्राश्वियाम्याभिजिद्भिर्जीवे रिक्ता च विश्वादितिवरुणविशाखानुराधामघाभिः। सौरे पूर्णा धनिष्ठाकरकमलजन्मर्क्षयुक्ता यदि स्याद् योगं प्राहुस्त्रिपूर्वं सततशुभकरं चामृताख्यं मुनीन्द्राः"।

**त्र्यम्बक** न° त्रीणि अम्बकानि नयनान्यस्य, त्रयाणां लोकानां अम्बकः पितेति वा, त्रीन् वेदान् अम्बते शब्दायते वा अबि–शब्दे कोऽउपधः कर्मण्यण् संज्ञायामिति कः त्रिषु लोकेषु कालेषु वा अम्बः